# Dashopanishatsarah Ratnapanchakam 4

# દશોપનિષત્સારઃ રત્નપઞ્ચકમ્ ૪

## Document Information

Text title : Dashopanishatsarah 3 (Ratnapanchakam 4)

File name : dashopaniShatsAraH3.itx

Category : upanishhat, upaniShad

Location : doc_upanishhat

Author : Kalyanasevaka

Proofread by : Brahatha Mohan

Latest update : May 22, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 23, 2026

*sanskritdocuments.org*

# દશોપનિષત્સારઃ રત્નપઞ્ચકમ્ ૪

(રત્નપઞ્ચકે ચતુર્થં રત્નમ્ ।)

ઈશકેનકઠપ્રશ્નમુણ્ડમાણ્ડૂક્યતિત્તિરિઃ ॥

ઐતરેયં ચ છાન્દોગ્યં બૃહદારણ્યકં તથા ॥ Oમ્ ॥

શાન્તિઃ -
શં નો મિત્રો ન ઇન્દ્રો હ્યવતુ પવન ! માં બ્રહ્મ સાક્ષાદ્ભવાન્નુ
પ્રત્યક્ષં નૌ ભુનક્તુ જ્ઞ ! સહગુણિગણૈર્વીર્યકાર્યં કરિષ્યે ।
છન્દોભ્યો વિશ્વરૂપોઽભવદહમધુના વિશ્રુવં ભૂરિસૌખ્યં
વૃક્ષસ્યાહં સુમૂલં હ્યદ ઇદમખિલં પૂર્ણં પૂર્ણં સ્વરૂપમ્ ॥ ૧॥

આપ્યાયન્ત્વિન્દ્રિયાણિ, ત્વિહ બલમખિલં સ્વાત્મધર્માશ્ચ સન્તુ,
શ્રૌતં મે મા પ્રહાસીર્મનસિ વસતુ તત્સત્યવિજ્ઞાનરૂપમ્ ।
ભદ્રં નઃ સર્વતઃ સ્યાન્નરસુરગણતઃ, સ્વસ્તિ ભૂયાજ્જનેભ્યો
બ્રહ્માત્માનં પ્રપદ્યે નમ ઇતિ ગુરવે, પ્રત્યગર્થોઽસ્મિ વસ્તુ ॥ ૨॥

૧. ઈશ- (ઈશોપનિષત્)
ઈશાવાસ્યં બહુવિધજગત્સર્વમેકાંશતો વૈ
તજ્જ્ઞાનાર્થં પ્રથમત ઇહ સ્વસ્ય ચિત્તસ્ય શુદ્ધિઃ ।
તત્કર્તવ્યા નિયતમનસા બ્રહ્મયાથાત્મસિદ્ધિઃ
શોકો મોહો ભવતિ ન તદા હ્યેકમેવાદ્વિતીયમ્ ॥ ૩॥

૨. કેન- (કેનોપનિષત્)
શ્રોત્રશ્રોત્રં યદિહ જગતિ પ્રાણચક્ષ્વિન્દ્રિયાણાં
વ્યાપારો હિ પ્રચલતિ નિજો યસ્ય સામર્થ્યયોગાત્ ।
અગ્નિર્વાયુઃ સુરપતિરપિ જ્ઞાતુમાસન્ન યદ્વૈ
વિજ્ઞાનં તદ્વિમલમૃતં બ્રહ્મ સાક્ષાત્કુરુષ્વ ॥ ૪॥

૩. કઠ- (કઠોપનિષત્)

શ્રેયો ધીરો વૃણીતે, વિષયસુરમણં પણ્ડિતમ્મન્યમાનાઃ
કુર્વન્તુ જ્ઞાનહીના, ઇહપરસુખિતા નૈવ તેષાં કદાઽપિ ।
લભ્યો વૈ નાયમાત્મા પ્રવચનવિધિના મેધયા સુશ્રુતેન,
પ્રજ્ઞાનેનાપ્નુયાત્તન્નિરુપમમમલં બ્રહ્મકલ્યાણરૂપમ્ ॥ ૫॥

૪. પ્રશ્ન- (પ્રશ્નોપનિષત્)
પ્રજાસૃષ્ટિં બ્રહ્માઽકુરુત સકલાં પ્રાણવિભવાં
મનો વાક્પ્રાણસ્ય સ્તવનમિહ કુર્વન્તિ ચ સુરાઃ ।
સ કર્તા દ્રષ્ટાદિઃ પરમપુરુષે તિષ્ઠતિ સદા
તમાત્માનં જ્ઞાત્વાઽક્ષરમજમખણ્ડં ભવતિ ના ॥ ૬॥

૫. મુણ્ડક- (મુણ્ડકોપનિષત્)
યસ્મિન્વિજ્ઞાત એકે ભવતિ ચ સકલં જ્ઞાતમેવેહ પૂર્ણં
યં સાક્ષાદ્બ્રહ્મવિદ્યાઽક્ષરમજમચલં પ્રાપયન્તી પરા સ્યાત્ ।
તજ્જ્ઞાનાર્થં સ ગચ્છેદ્ગુરુમિહ શરણં શ્રોત્રિયં બ્રહ્મનિષ્ઠં
બ્રહ્મૈવેદં વિજાનન્ શમદમસહિતો બ્રહ્મભૂતો ભવેત્સઃ ॥ ૭॥

૬. માણ્ડૂક્ય- (માણ્ડુક્યોપનિષત્)
ત્રિકાલાતીતઃ સન્સકલસમયો યસ્ત્રિવિધતઃ
સ એવોઙ્કારશ્ચિદ્વિમલપરમાત્મા શિવતમઃ ।
સ આત્મા વિજ્ઞેયસ્ત્રિપદરહિતઃ શાન્તિપરમો
હ્યદૃષ્ટોઽગ્રાહ્યોઽજો હૃદયકમલેઽન્તર્બહિરપિ ॥ ૮॥

૭. તૈત્તિરીય- તૈત્તિરીયોપનિષત્)
સત્યં જ્ઞાનં હ્યનન્તં શતશતગુણિતં પૂર્ણમાનન્દમેકં
યસ્માત્પ્રાણો મનો વાક્સકલસુરગણો દૂરમત્યન્તમસ્તિ ।
સર્વે ધાવન્તિ ભીત્યા રવિયમપવનાઃ પઞ્ચકોશાતિદૂરં
હ્યપ્રાપ્યં ભેદબુદ્ધ્યાઽભયમચલમયં બ્રહ્મવિત્પ્રાપ્નુયાત્તત્ ॥ ૯॥

૮. ઐતરેય - (ઐતરેયોપનિષત્)
સર્વં પ્રજ્ઞાનમેવ ક્રતુધૃતિમતયઃ કામસંજ્ઞાનમેધાઃ
સઙ્કલ્પોઽજ્ઞાનજૂતી સ્મૃતિહૃદયવશા નામધેયાનિ તસ્ય ।
પ્રજ્ઞાનં બ્રહ્મસાક્ષાત્સુરનરસહિતઃ સ્થાવરો જઙ્ગમશ્ચ
પ્રજ્ઞાને સર્વલોકોઽમૃતમિહ સ ભજેજ્જ્ઞાનવિજ્ઞાનપૂર્ણઃ ॥ ૧૦॥

૯. છાન્દોગ્ય- (છાન્દોગ્યોપનિષત્)

સર્વં બ્રહ્મૈવ નાન્યદ્ધૃદિ બહિરખિલં શ્લિષ્યતે નાપિ કેન
પ્રાણઃ કં ખં મનો વૈ જગદિદમખિલં ભાવયેદ્બ્રહ્મ પૂર્ણમ્ ।
મૃત્પિણ્ડાન્મૃણ્મયં તત્કલશમુખમિદં નામરૂપં ચ મિથ્યા
તસ્માદ્બ્રહ્મૈવ સાક્ષાત્ત્વમસિ વિમલતત્સચ્ચિદાનન્દભૂમા ॥ ૧૧॥

૧૦. બૃહદારણ્યક- (બૃહદારણ્યકોપનિષત્)
ઓતઃપ્રોતોઽયમાત્મા, સકલનરવરૈઃ પૂર્ણવૈરાગ્યયુક્તૈ -
ર્બાલ્યં મૌનં ચ કૃત્વાઽક્ષરમજમમનો બ્રહ્મ વેદ્યં પ્રયત્નૈઃ ।
નાનાભાનં વિહાય પ્રવચનમતિસંલાપનં શાસ્ત્રવેદાન્
શાન્તો દાન્તસ્તિતિક્ષુઃ પરમસુખધનં બ્રહ્મ ભૂયાત્સ્વસંરાટ્ ॥ ૧૨॥

વેદાન્તાર્થાતિસારોપનિષદમૃતતદ્બ્રહ્મપીયૂષપાનં
કૃત્વાઽહઙ્કારશૂન્યો મમતવરહિતઃ સચ્ચિદાનન્દપૂર્ણઃ ।
આચાર્યં શઙ્કરં સદ્ગુરુમહમનમં નિત્યકલ્યાણમાસં
શાન્તિઃ શાન્તિઃ સુશાન્તિર્ભવભયગલિતં બ્રહ્મસામ્રાજ્યમાપ્તમ્ ॥ ૧૩॥

એતત્સારસ્ય પાઠાત્સતતસુમનનાધ્યાસતઃ પૂર્ણસાક્ષા-
ત્કારાદ્બ્રહ્મૈવ ભૂયાચ્છમદમસહિતઃ શુદ્ધસત્ત્વો વિરાગી ।
કષ્ટં નૈવાત્ર કિઞ્ચિન્ન્વખિલમુષનિષદ્ભાષ્યજાલં ચ માસ્તુ
કલ્યાણઃસેવકોઽયં ત્રિગુણવિરહિતં કેવલં બ્રહ્મ વસ્તુ ॥ ૧૪॥

ઇતિ શ્રીસમર્થરામદાસ-કલ્યાણપદાન્વિત-
કલ્યાણસેવકપ્રણીત રત્નપઞ્ચકે ચતુર્થં રત્નં
દશોપનિષત્સારો નામ સમ્પૂર્ણમ્ ।

Proofread by Brahatha Mohan

*Dashopanishatsarah Ratnapanchakam 4*

pdf was typeset on May 23, 2026

Please send corrections to *sanskrit@cheerful.com*